## Viṣṇusahasranāma

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।

प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १ ॥

om śuklāmbaradharaṁ viṣṇuṁ śaśivarṇaṁ caturbhujam |
prasannavadanaṁ dhyāyet sarvavignopaśāntaye || 1 ||

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।

पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥ २ ॥

vyāsaṁ vasiṣṭhanaptāraṁ śakteḥ pautramakalmaṣam |
parāśarātmajaṁ vande śukatātaṁ taponidhim || 2 ||

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।

नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ ३ ॥

vyāsāya viṣṇurūpāya vyāsarūpāya viṣṇave |
namo vai brahmanidhaye vāsiṣṭhāya namo namaḥ || 3 ||

अविकाराय शुद्धाय नित्याय परमात्मने ।

सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ ४ ॥

avikārāya śuddhāya nityāya paramātmane |
sadaikarūparūpāya viṣṇave sarvajiṣṇave || 4 ||

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।

विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ ५ ॥

ॐ नमो विष्णवे प्रभविष्णवे ॥

yasya smaraṇamatreṇa janmasaṁsārabandhanāt |
vimucyate namastasmai viṣṇave prabhaviṣṇave || 5 ||
om namo viṣṇave prabhaviṣṇave ||

श्रीवैशंपायहन उवाच

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः।

युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ ६ ॥

śrīvaiśampāyahana uvāca
śrutvā dharmānaśeṣeṇa pāvanāni ca sarvaśaḥ |
yudhiṣṭhiraḥ śāntanavaṁ punarevābhyabhāṣata || 6 ||

युधिष्ठिर उवाच

किमेकं दैवतं लोके किं वाऽप्येकं परायणम्।

स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभं ॥ ७ ॥

yudhiṣṭhira uvāca
kimekaṁ daivataṁ loke kiṁ vā 'pyekaṁ parāyaṇam |
stuvantaḥ kaṁ kamarcantaḥ prāapnuyurmānavāḥ śubhaṁ || 7 ||

को धर्मः सर्वधर्माणां भवतः परमो मतः।

किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥ ८ ॥

ko dharmaḥ sarvadharmāṇāṁ bhavataḥ paramo mataḥ |
kiṁ japan mucyate jantur janmasaṁsārabandhanāt || 8 ||

श्रीभीष्म उवाच

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम्।

स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः॥ ९ ॥

śrībhīṣma uvāca
jagatprabhuṁ devadevam anantaṁ puruṣottamam |
stuvannāmasahasreṇa puruṣaḥ satatotthitaḥ || 9 ||

तमेव चार्चयन् नित्यं भक्त्या पुरुषमव्ययम् ।

ध्यायन् स्तुवन् नमस्यंश्च यजमानस्तमेव च ॥ १० ॥

tameva cārcayan nityaṁ bhaktyā puruṣamavyayam |
dhyāyan stuvan namasyaṁśca yajamānastameva ca || 10 ||

अनादिनिद्धनं विष्णुं सर्वलोकमहेश्वरम् ।

लोकाध्यक्षं स्तुवन् नित्यं सर्वदुःखातिगो भवेत् ॥ ११ ॥

anādiniddhanaṁ viṣṇuṁ sarvalokamaheśvaram |
lokādhyakṣaṁ stuvan nityaṁ sarvaduḥkhātigo bhavet || 11 ||

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।

लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ १२ ॥

brahmaṇyaṁ sarvadharmajñaṁ lokānāṁ kīrtivardhanam |
lokanāthaṁ mahadbhūtaṁ sarvabhūtabhavodbhavam || 12 ||

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।

यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ १३ ॥

eṣa me sarvadharmāṇāṁ dharmo'dhikatamo mataḥ |
yadbhaktyā puṇḍarīkākṣaṁ stavairarcennaraḥ sadā || 13 ||

परमं यो महत्तेजः परमं यो महत्तपः ।

परमं यो महद्ब्रह्म परमं यः परायणम् ॥ १४ ॥

paramaṁ yo mahattejaḥ paramaṁ yo mahattapaḥ |
paramaṁ yo mahadbrahma paramaṁ yaḥ parāyaṇam || 14 ||

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।

दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥ १५ ॥

pavitrāṇāṁ pavitraṁ yo maṅgalānāṁ ca maṅgalam |
daivataṁ devatānāṁ ca bhūtānāṁ yo'vyayaḥ pitā || 15 ||

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।

यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ १६ ॥

yataḥ sarvāṇi bhūtāni bhavantyādiyugāgame |
yasmiṁśca pralayaṁ yānti punareva yugakṣaye || 16 ||

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।

विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १७ ॥

tasya lokapradhānasya jagannāthasya bhūpate |
viṣṇornāmasahasraṁ me śṛṇu pāpabhayāpaham || 17 ||

यानि नामानि गौणानि विख्यातानि महात्मनः ।

ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ १८ ॥

yāni nāmāni gauṇāni vikhyātāni mahātmanaḥ |
ṛṣibhiḥ parigītāni tāni vakṣyāmi bhūtaye || 18 ||

ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ।

छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः ॥ १९ ॥

ṛṣirnāmnāṁ sahasrasya vedavyāso mahāmuniḥ |
chando'nuṣṭup tathā devo bhagavān devakīsutaḥ || 19 ||

अमृतांशूद्भवो बीजं शक्तिर्देवकीनन्दनः ।

त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते ॥ २० ॥

amṛtāṁśūdbhavo bījaṁ śaktirdevakīnandanaḥ |
trisāmā hṛdayaṁ tasya śāntyarthe viniyujyate || 20 ||

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।

अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम् ॥ २१ ॥

viṣṇuṁ jiṣṇuṁ mahāviṣṇuṁ prabhaviṣṇuṁ maheśvaram |
anekarūpadaityāntaṁ namāmi puruṣottamam || 21 ||

न्यासः

अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य श्रीवेदव्यासो भगवान् ऋषिः । अनुष्टुप् चन्दः ।श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता । अमृतांशूद्भवो भानुरिति बीजम् । देवकीनन्दनः स्रष्टेति शक्तिः । उद्भवः क्षोभणो देव इति परमो मन्त्रः । शङ्खभृन्नन्दकी चक्रीति कीलकम् । शार्ङ्गधन्वा गदाधर इत्यस्त्रम् । रथाङ्गपाणिरक्षोभ्य इति नेत्रम् । त्रिसामा सामगः सामेति कवचम् । आनन्दं परब्रह्मेति योनिः । ऋतुः सुदर्शनः काल इति दिग्बन्धः । श्रीविश्वरूप इति ध्यानम् । श्रीमहाविष्णुप्रीत्यर्थे सहस्रनामजपे विनियोगः ॥

nyāsaḥ
asya śrīviṣṇordivyasahasranāmastotramahāmantrasya śrīvedavyāso bhagavān ṛṣiḥ | anuṣṭup candaḥ |śrīmahāviṣṇuḥ paramātmā śrīmannārāyaṇo devatā | amṛtāṁśūdbhavo bhānuriti bījam | devakīnandanaḥ sraṣṭeti śaktiḥ | udbhavaḥ kṣobhaṇo deva iti paramo mantraḥ | śaṅkhabhṛnnandakī cakrīti kīlakam | śārṅgadhanvā gadādhara ityastram | rathāṅgapāṇirakṣobhya iti netram | trisāmā sāmagaḥ sāmeti kavacam | ānandaṁ parabrahmeti yoniḥ | ṛtuḥ sudarśanaḥ kāla iti digbandhaḥ | śrīviśvarūpa iti dhyānam | śrīmahāviṣṇuprītyarthe sahasranāmajape viniyogaḥ ||

ध्यानम्

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानां

मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।

शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षैः

आनन्दी नः पुनीयादरिनलिनगदाशङ्खपाणिर्मुकुन्दः ॥ २२ ॥

dhyānam
kṣīrodanvatpradeśe śucimāṇivilasatsaikate mauktikānāṁ
mālāklṛptāsanasthaḥ sphaṭikamaṇinibhairmauktikairmaṇḍitāṅgaḥ ।
śubhrairabhrairadabhrairupariviracitairmuktapīyūṣavarṣaiḥ
ānandī naḥ punīyādarinalinagadāśaṅkhapāṇirmukundaḥ ।। 22 ।।

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तस्स्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः
चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥ २३ ॥
ओं नमो भगवते वासुदेवाय ।

bhūḥ pādau yasya nābhirviyadasuranilaścandrasūryau ca netre
karṇāvāśāḥ śiro dyaurmukhamapi dahano yasya vāsteyamabdhiḥ ।
antassthaṁ yasya viśvaṁ suranarakhagagobhogigandharvadaityaiḥ
citraṁ raṁramyate taṁ tribhuvanavapuṣaṁ viṣṇumīśaṁ namāmi ।। 23 ।।
oṁ namo bhagavate vāsudevāya ।

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ २४ ॥

śāntākāraṁ bhujagaśayanaṁ padmanābhaṁ sureśaṁ
viśvādhāraṁ gaganasadṛśaṁ meghavarṇaṁ śubhāṅgam ।
lakṣmīkāntaṁ kamalanayanaṁ yogihṛddhyānagamyaṁ
vande viṣṇuṁ bhavabhayaharaṁ sarvalokaikanātham ।। 24 ।।

मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम् ॥ २५ ॥

meghaśyāmaṁ pītakauśeyavāsaṁ śrīvatsāṅkaṁ kaustubhodbhāsitāṅgam ।
puṇyopetaṁ puṇḍarīkāyatākṣaṁ viṣṇuṁ vande sarvalokaikanātham ।। 25 ।।

नमः समस्तभूतानामादिभूताय भूभृते ।

अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥ २६ ॥

namaḥ samastabhūtānāmādibhūtāya bhūbhṛte |
anekarūparūpāya viṣṇave prabhaviṣṇave || 26 ||

सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।

सहारवक्षस्स्थलशोभिकौस्तुभं नमामि विष्णुं शिरसा चतुर्भुजम् ॥ २७ ॥

saśaṅkhacakraṁ sakirīṭakuṇḍalaṁ sapītavastraṁ sarasīruhekṣaṇam |
sahāravakṣassthalaśobhikaustubhaṁ namāmi viṣṇuṁ śirasā caturbhujam || 27 ||

छायायां पारिजातस्य हेमसिंहासनोपरि ।

आसीनमम्बुदश्याममायताक्षमलङ्कृतम् ॥ २८ ॥

chāyāyāṁ pārijātasya hemasiṁhāsanopari |
āsīnamambudaśyāmamāyatākṣamalaṅkṛtam || 28 ||

चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कितवक्षसम् ।

रुक्मिणीसत्यभामाभ्यां सहितं कृष्णमाश्रये ॥ २९ ॥

candrānanaṁ caturbāhuṁ śrīvatsāṅkitavakṣasam |
rukmiṇīsatyabhāmābhyāṁ sahitaṁ kṛṣṇamāśraye || 29 ||

## सहस्रनामावलि

**sahasranāmāvali**

ओं नमो भगवते वासुदेवाय ।

oṁ namo bhagavate vāsudevāya ।

ओं विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।

भूतकृद् भूतभृद् भावो भूतात्मा भूतभावनः ॥ १ ॥

oṁ viśvaṁ viṣṇurvaṣaṭkāro bhūtabhavyabhavatprabhuḥ ।
bhūtakṛd bhūtabhṛd bhāvo bhūtātmā bhūtabhāvanaḥ ।। 1 ।।

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।

अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २ ॥

pūtātmā paramātmā ca muktānāṁ paramā gatiḥ ।
avyayaḥ puruṣaḥ sākṣī kṣetrajño'kṣara eva ca ।। 2 ।।

योगो योगविदां नेता प्रधानपुरुषेश्वरः ।

नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ ३ ॥

yogo yogavidāṁ netā pradhānapuruṣeśvaraḥ ।
nārasiṁhavapuḥ śrīmān keśavaḥ puruṣottamaḥ ।। 3 ।।

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।

संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४ ॥

sarvaḥ śarvaḥ śivaḥ sthāṇurbhūtādirnidhiravyayaḥ ।
sambhavo bhāvano bhartā prabhavaḥ prabhurīśvaraḥ ।। 4 ।।

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ।

अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५ ॥

svayambhūḥ śambhurādityaḥ puṣkarākṣo mahāsvanaḥ |
anādinidhano dhātā vidhātā dhāturuttamaḥ || 5 ||

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।

विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६ ॥

aprameyo hṛsīkeśaḥ padmanābho'maraprabhuḥ |
viśvakarmā manustvaṣṭā sthaviṣṭhaḥ sthaviro dhruvaḥ || 6 ||

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।

प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ ७ ॥

agrāhyaḥ śāśvataḥ kṛṣṇo lohitākṣaḥ pratardanaḥ |
prabhūtastrikakubdhāma pavitraṁ maṅgalaṁ param || 7 ||

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।

हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८ ॥

īśānaḥ prāṇadaḥ prāṇo jyeṣṭhaḥ śreṣṭhaḥ prajāpatiḥ |
hiraṇyagarbho bhūgarbho mādhavo madhusūdanaḥ || 8 ||

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।

अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९ ॥

īśvaro vikramī dhanvī medhāvī vikramaḥ kramaḥ |
anuttamo durādharṣaḥ kṛtajñaḥ kṛtirātmavān || 9 ||

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।

अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ १० ॥

sureśaḥ śaraṇaṁ śarma viśvaretāḥ prajābhavaḥ |
ahaḥ saṁvatsaro vyālaḥ pratyayaḥ sarvadarśanaḥ || 10 ||

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।

वृषाकपिरमेयात्मा सर्वयोगविनिस्सृतः ॥ ११ ॥

ajaḥ sarveśvaraḥ siddhaḥ siddhiḥ sarvādiracyutaḥ |
vṛṣākapirameyātmā sarvayogavinissṛtaḥ || 11 ||

वसुर्वसुमनाः सत्यः समात्माऽसंमितः समः ।

अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १२ ॥

vasurvasumanāḥ satyaḥ samātmā'sammitaḥ samaḥ |
amodhaḥ puṇḍarīkākṣo vṛṣakarmā vṛṣākṛtiḥ || 12 ||

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।

अमृतः शास्वतस्थाणुर्वरारोहो महातपाः ॥ १३ ॥

rudro bahuśirā babhrurviśvayoniḥ śuciśravāḥ |
amṛtaḥ śāsvatasthāṇurvarāroho mahātapāḥ || 13 ||

सर्वगः सर्वविद्भानुः विष्वक्सेनो जनार्दनः ।

वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ॥ १४ ॥

sarvagaḥ sarvavidbhānuḥ viṣvakseno janārdanaḥ |
vedo vedavidavyaṅgo vedāṅgo vedavitkaviḥ || 14 ||

लोकध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।

चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥

lokadhyakṣaḥ surādhyakṣo dharmādhyakṣaḥ kṛtākṛtaḥ |
caturātmā caturvyūhaścaturdaṁṣṭraścaturbhujaḥ || 15 ||

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।

अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६ ॥

bhrājiṣṇurbhojanaṁ bhoktā sahiṣṇurjagadādijaḥ |
anagho vijayo jetā viśvayoniḥ punarvasuḥ || 16 ||

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।

अतीन्द्रः संग्रहः सर्गा धृतात्मा नियमो यमः ॥ १७ ॥

upendro vāmanaḥ prāṁśuramoghaḥ śucirūrjitaḥ |
atīndraḥ saṅgrahaḥ sargā dhṛtātmā niyamo yamaḥ || 17 ||

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।

अतीन्द्रियो महामायो महोत्साहो महाबलः ॥ १८ ॥

vedyo vaidyaḥ sadāyogī vīrahā mādhavo madhuḥ |
atīndriyo mahāmāyo mahotsāho mahābalaḥ || 18 ||

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।

अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९ ॥

mahābuddhirmahāvīryo mahāśaktirmahādyutiḥ |
anirdeśyavapuḥ śrīmānameyātmā mahādridhṛk || 19 ||

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।

अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥ २० ॥

maheṣvāso mahībhartā śrīnivāsaḥ satāṁ gatiḥ |
aniruddhaḥ surānando govindo govidāṁ patiḥ || 20 ||

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।

हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१ ॥

marīcirdamano haṁsaḥ suparṇo bhujagottamaḥ |
hiraṇyanābhaḥ sutapāḥ padmanābhaḥ prajāpatiḥ || 21 ||

अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः ।

अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ २२ ॥

amṛtyuḥ sarvadṛk siṁhaḥ sandhātā sandhimān sthiraḥ |
ajo durmarṣaṇaḥ śāstā viśrutātmā surārihā || 22 ||

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।

निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २३ ॥

gururgurutamo dhāma satyaḥ satyaparākramaḥ |
nimiṣo'nimiṣaḥ sragvī vācaspatirudāradhīḥ || 23 ||

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ।

सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ २४ ॥

agraṇīrgrāmaṇīḥ śrīmān nyāyo netā samīraṇaḥ |
sahasramūrdhā viśvātmā sahasrākṣaḥ sahasrapāt || 24 ||

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ।

अहःसंवर्तको वह्निरनिलो धरणीधरः ॥ २५ ॥

āvartano nivṛttātmā saṁvṛtaḥ sampramardanaḥ |
ahaḥsaṁvartako vahniranilo dharaṇīdharaḥ || 25 ||

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्वभुः ।

सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ २६ ॥

suprasādaḥ prasannātmā viśvadhṛgviśvabhugvabhuḥ |
satkartā satkṛtaḥ sādhurjahnurnārāyaṇo naraḥ || 26 ||

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।

सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ २७ ॥

asaṅkhyeyo'prameyātmā viśiṣṭaḥ śiṣṭakṛcchuciḥ |
siddhārthaḥ siddhasaṅkalpaḥ siddhidaḥ siddhisādhanaḥ || 27 ||

वृषाही वृषभो विष्णुः वृषपर्वा वृषोदरः ।

वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २८ ॥

vṛṣāhī vṛṣabho viṣṇuḥ vṛṣaparvā vṛṣodaraḥ |
vardhano vardhamānaśca viviktaḥ śrutisāgaraḥ || 28 ||

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।

नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९ ॥

subhujo durdharo vāgmī mahendro vasudo vasuḥ |
naikarūpo bṛhdrūpaḥ śipiviṣṭaḥ prakāśanaḥ || 29 ||